2026 *MAVYC401/26*

MAVYC401

वैयाकरणभूषणसारः -1

प्रथमपत्रम्

पूर्णाङ्काः – 80

समयः – घण्टात्रयम्

अधस्तनानां प्रश्नानां संक्षिप्तमुत्तरं प्रदेयम् - 1×10=10

1. बृहद्वैयाकरणभूषणसारस्य कर्ता कः?
2. संख्यायाः कुत्रान्वयो भवति?
3. साध्यत्वेनोपस्थिता क्रिया कस्य रूपं धारयति?
4. हेलाराजेन वाक्यस्य लक्षणं किमुक्तम् ?
5. वर्तमानस्य लक्षणं किम् ?
6. किन्नाम प्रवर्तनात्त्वम् ?
7. उदासीनकर्मणः उदाहरणं किम् ?
8. वाक्यपदीयकारमते सम्प्रदानस्य कति भेदाः?
9. त्रिकमिति पदेन किं स्वीक्रियते ?
10. ग्राहकत्वं किम् ?

अधस्तनेषु प्रश्नेषु पञ्च समाधेयाः - 6×5=30

11. 'फलव्यापारयोर्धातु'.... इत्यस्य ग्रन्थदिशा व्याख्या विधेया।
12. 'साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना'.... इत्यादि कारिका व्याख्येया।
13. 'विधिनिमन्त्रणामन्त्रणाद्यर्थेषु लिङ्' अस्य व्याख्या संक्षेपेण क्रियताम् ?
14. 'सुपां कर्मादयोऽप्यर्था संख्या चैव तथा तिङाम्' इति ग्रन्थदिशा व्याख्यायत।
15. 'जातिः नामार्थः' इति पक्षं: भूषणदिशा निरूपणीयः ।
16. कर्म कतिविधम् ? संक्षेपेण व्याख्यायत।
17. भूषणदिशा करणतृतीयार्थो निरूप्यताम्।

अधोलिखितेषु प्रश्नेषु चत्वारः समाधेयाः - 10×4=40

18. तिङर्थाः के? तेषां पर स्पराऽन्वयप्रदर्शनपूर्वकं वैयाकरणनैयायिकमीमांसकमते शाब्दबोधे वैलक्षण्यं कथम्? निरूपणीयम् ।
19. भेद्यभेदकसम्बन्धोपाधीति कारिका व्याख्येया?
20. 'वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति' ... इति विस्तरेण व्याख्यायत ।
21. आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
    यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः ॥ अस्याः कारिकायाः व्याख्या कार्या ।
22. एकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।
    नामाऽर्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः ॥ अस्याः कारिकायाः ग्रन्थदिशा व्याख्या कार्या।
23. अस्त्यादावपिधर्म्यंशे भाव्येऽस्त्येव हि भावना ।
    अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥कारिकेयं सोदाहरणं व्याख्यायताम् ।

****